श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे

# ॥ षड्विंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ षड्विंशः सर्गः ॥

## हनुमता सुग्रीवस्याभिषेकाय श्रीरामं प्रति किष्किन्धां गन्तुं प्रार्थनं श्रीरामेण तत्र गमनं विनैवानुमतिप्रदानं तदनु सुग्रीवाङ्गदयोरभिषेकः

ततः शोकाभिसन्तप्तं सुग्रीवं क्लिन्नवाससम्।
शाखामृगमहामात्राः परिवार्योपतस्थिरे ॥ **4.26.1** ॥

अभिगम्य महाबाहुं राममक्लिष्टकारिणम्।
स्थिताः प्राञ्जलयः सर्वे पितामहमिवर्षयः ॥ **4.26.2** ॥

ततः काञ्चनशैलाभस्तरुणार्कनिभाननः।
अब्रवीत् प्राञ्जलिर्वाक्यं हनूमान् मारुतात्मजः ॥ **4.26.3** ॥

भवत्प्रसादात् काकुत्स्थ पितृपैतामहं महत्।
वानराणां सुदंष्ट्राणां सम्पन्नबलशालिनाम् ॥ **4.26.4** ॥

महात्मनां सुदुष्प्रापं प्राप्तं राज्यमिदं प्रभो।
भवता समनुज्ञातः प्रविश्य नगरं शुभम् ॥ **4.26.5** ॥

संविधास्यति कार्याणि सर्वाणि ससुहृद्गणः।
स्नातोऽयं विविधैर्गन्धैरौषधैश्च यथाविधि ॥ **4.26.6** ॥

अर्चयिष्यति माल्यैश्च रत्नैश्च त्वां विशेषतः।
इमां गिरिगुहां रम्यामभिगन्तुं त्वमर्हसि ॥ **4.26.7** ॥

कुरुष्व स्वामिसम्बन्धं वानरान् सम्प्रहर्षय।
एवमुक्तो हनुमता राघवः परवीरहा॥ **4.26.8** ॥

प्रत्युवाच हनूमन्तं बुद्धिमान् वाक्यकोविदः।
चतुर्दश समाः सौम्य ग्रामं वा यदि वा पुरम्॥ **4.26.9** ॥

न प्रवेक्ष्यामि हनुमन् पितुर्निर्देशपालकः।
सुसमृद्धां गुहां दिव्यां सुग्रीवो वानरर्षभः॥ **4.26.10** ॥

प्रविष्टो विधिवद् वीरः क्षिप्रं राज्येऽभिषिच्यताम्।
एवमुक्त्वा हनूमन्तं रामः सुग्रीवमब्रवीत्॥ **4.26.11** ॥

वृत्तज्ञो वृत्तसम्पन्नमुदारबलविक्रमम्।
इममप्यङ्गदं वीरं यौवराज्येऽभिषेचय॥ **4.26.12** ॥

ज्येष्ठस्य हि सुतो ज्येष्ठः सदृशो विक्रमेण च।
अङ्गदोऽयमदीनात्मा यौवराज्यस्य भाजनम्॥ **4.26.13** ॥

पूर्वोऽयं वार्षिको मासः श्रावणः सलिलागमः।
प्रवृत्ताः सौम्य चत्वारो मासा वार्षिक संज्ञिताः॥ **4.26.14** ॥

नायमुद्योगसमयः प्रविश त्वं पुरीं शुभाम्।
अस्मिन् वत्स्याम्यहं सौम्य पर्वते सहलक्ष्मणः॥ **4.26.15** ॥

इयं गिरिगुहा रम्या विशाला युक्तमारुता।
प्रभूतसलिला सौम्य प्रभूतकमलोत्पला॥ **4.26.16** ॥

कार्तिके समनुप्राप्ते त्वं रावणवधे यत।
एष नः समयः सौम्य प्रविश त्वं स्वमालयम्॥ **4.26.17** ॥

अभिषिञ्चस्व राज्ये च सुहृदः सम्प्रहर्षय।
इति रामाभ्यनुज्ञातः सुग्रीवो वानरर्षभः॥ **4.26.18** ॥

प्रविवेश पुरीं रम्यां किष्किन्धां वालिपालिताम्।
तं वानरसहस्राणि प्रविष्टं वानरेश्वरम्॥ **4.26.19** ॥

अभिवार्य प्रविष्टानि सर्वतः प्लवगेश्वरम्।
ततः प्रकृतयः सर्वा दृष्ट्वा हरिगणेश्वरम्॥ **4.26.20** ॥

प्रणम्य मूर्ध्ना पतिता वसुधायां समाहिताः।
सुग्रीवः प्रकृतीः सर्वाः सम्भाष्योत्थाप्य वीर्यवान्॥ **4.26.21** ॥

भ्रातुरन्तःपुरं सौम्यं प्रविवेश महाबलः।
प्रविष्टं भीमविक्रान्तं सुग्रीवं वानरर्षभम्॥ **4.26.22** ॥

अभ्यषिञ्चन्त सुहृदः सहस्राक्षमिवामराः।
तस्य पाण्डुरमाजह्रुश्छत्रं हेमपरिष्कृतम्॥ **4.26.23** ॥

शुक्ले च वालव्यजने हेमदण्डे यशस्करे।
तथा रत्नानि सर्वाणि सर्वबीजौषधानि च॥ **4.26.24** ॥

सक्षीराणां च वृक्षाणां प्ररोहान् कुसुमानि च।
शुक्लानि चैव वस्त्राणि श्वेतं चैवानुलेपनम्॥ **4.26.25** ॥

सुगन्धीनि च माल्यानि स्थलजान्यम्बुजानि च।
चन्दनानि च दिव्यानि गन्धांश्च विविधान् बहून्॥ **4.26.26** ॥

अक्षतं जातरूपं च प्रियङ्गुं मधुसर्पिषी।
दधि चर्म च वैयाघ्रं परार्ध्ये चाप्युपानहौ॥ **4.26.27** ॥

समालम्भनमादाय गोरोचनं मनःशिलाम्।
आजग्मुस्तत्र मुदिता वराः कन्याश्च षोडश॥ **4.26.28** ॥

ततस्ते वानरश्रेष्ठमभिषेक्तुं यथाविधि।
रत्नैर्वस्त्रैश्च भक्ष्यैश्च तोषयित्वा द्विजर्षभान्॥ **4.26.29** ॥

ततः कुशपरिस्तीर्णं समिद्धं जातवेदसम्।
मन्त्रपूतेन हविषा हुत्वा मन्त्रविदो जनाः॥ **4.26.30** ॥

ततो हेमप्रतिष्ठाने वरास्तरणसंवृते।
प्रासादशिखरे रम्ये चित्रमाल्योपशोभिते॥ **4.26.31** ॥

प्राङ्मुखं विधिवन्मन्त्रैः स्थापयित्वा वरासने।
नदीनदेभ्यः संहृत्य तीर्थेभ्यश्च समन्ततः॥ **4.26.32** ॥

आहृत्य च समुद्रेभ्यः सर्वेभ्यो वानरर्षभाः।
अपः कनककुम्भेषु निधाय विमलं जलम्॥ **4.26.33** ॥

शुभैर्ऋषभशृङ्गैश्च कलशैश्चैव काञ्चनैः।
शास्त्रदृष्टेन विधिना महर्षिविहितेन च॥ **4.26.34** ॥

गजो गवाक्षो गवयः शरभो गन्धमादनः।
मैन्दश्च द्विविदश्चैव हनूमाञ्जाम्बवांस्तथा॥ **4.26.35** ॥

अभ्यषिञ्चत सुग्रीवं प्रसन्नेन सुगन्धिना।
सलिलेन सहस्राक्षं वसवो वासवं यथा॥ **4.26.36** ॥

अभिषिक्ते तु सुग्रीवे सर्वे वानरपुङ्गवाः।
प्रचुक्रुशुर्महात्मानो हृष्टाः शतसहस्रशः॥ **4.26.37** ॥

रामस्य तु वचः कुर्वन् सुग्रीवो वानरेश्वरः।
अङ्गदं सम्परिष्वज्य यौवराज्येऽभ्यषेचयत्॥ **4.26.38** ॥

अङ्गदे चाभिषिक्ते तु सानुक्रोशाः प्लवङ्गमाः।
साधु साध्विति सुग्रीवं महात्मानो ह्यपूजयन्॥ **4.26.39** ॥

रामं चैव महात्मानं लक्ष्मणं च पुनः पुनः।
प्रीताश्च तुष्टुवुः सर्वे तादृशे तत्र वर्तिनि॥ **4.26.40** ॥

हृष्टपुष्टजनाकीर्णा पताकाध्वजशोभिता।
बभूव नगरी रम्या किष्किन्धा गिरिगह्वरे॥ **4.26.41** ॥

निवेद्य रामाय तदा महात्मने
महाभिषेकं कपिवाहिनीपतिः।
रुमां च भार्यामुपलभ्य वीर्यवा
नवाप राज्यं त्रिदशाधिपो यथा॥ **4.26.42** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे षड्विंशः सर्गः॥